# 2022

## SANSKRIT — HONOURS

### Paper : CC-3

### [Classical Sanskrit Literature (Prose)]

### Full Marks : 65

*The figures in the margin indicate full marks.*

*Candidates are required to give their answers in their own words as far as practicable.*

**Section – A**

MURALIDHAR GIRLS' COLLEGE LIBRARY

**Unit – I**

**(Marks : 10)**

1. कश्चन्द्रापीड़ः? कथं शुकनासः चन्द्रापीड़मुपदिशति? तत्प्रदत्ता उपदेशाः पाठ्यानुसारेण सारतः विव्रियन्ताम्। 1+2+7

***अथवा,***

(a) कस्यच**नैकस्य** मातृभाषायामनुवादः क्रियताम्।

(i) अपरिणामोपशमो दारुणः लक्ष्मीमदः। कष्टमनञ्जनवर्तिसाध्यमपरम् ऐश्वर्यतिमिरान्धत्वम् अशिशिरोपचारहार्योऽतितीव्रो दर्पदाहज्वरोष्मा।

(ii) यौवनारम्भे च प्रायः शास्त्रजलप्रक्षालननिर्मलापि कालुष्यमुपयाति बुद्धिः। अनुज्झितधवलापि सरागैव भवति यूनां दृष्टिः। अपहरति च वात्येव शुष्कपत्रं समुद्भूतरजोभ्रान्तिरतिदूरम् आत्मेच्छया यौवनसमये पुरुषं प्रकृतिः।

(b) अधोलिखितयोः कस्यचित् ***एकस्य*** भावः सम्प्रसार्यताम्। 5

(i) गुरुवचनममलमपि सलिलमिव महदुपजनयति श्रवणस्थितं शूलमभव्यस्य।

(ii) आलोकयतु तावत् कल्याणाभिनिवेशी लक्ष्मीमेव प्रथमम्।

**Unit – II**

**(Marks : 10)**

2. 'कादम्बरीरसज्ञानामाहारोऽपि न रोचते' – इत्युक्तेः याथार्थ्यं विचार्यताम्। 10

***अथवा,***

बाणभट्टः कः आसीत्? तस्य रचना काः आसन्? किं प्रकारं काव्यं कादम्बरी इति? 'कादम्बरी' इति शब्दस्य कोऽर्थः? 2+2+5+1

Please Turn Over

**Section – B**

**Unit – I**

**(Marks : 15)**

**3.** (a) अधोलिखितेषु ***पञ्चानां*** प्रश्नानामुत्तरं **संस्कृतभाषया देवनागरलिप्या च** लेखनीयम्। 2×5

(i) कः दर्पसारः? स तपस्यार्थं कुत्र अगच्छत्?

(ii) क आसीत् चण्डवर्मा? तेन सह मालवराजस्य कः सम्बन्धः?

(iii) दशकुमारचरिते दशकुमाराः के सन्ति?

(iv) 'प्रत्यबुध्येतां चोभौ' – अत्र उभौ इत्यनेन कौ बोधितौ?

(v) "श्रुत्वातु भुवनवृत्तान्तमुत्तमाङ्गना..." – उत्तमाङ्गना का भवति? केन भुवनवृत्तान्तं वर्णितम्?

(vi) 'चित्रवधः' कः भवति?

(vii) "मुक्तकण्ठमाचक्रन्द राजकन्या" – अत्र राजकन्याशब्देन का बोधिता? कदा च सा मुक्तकण्ठं क्रन्दितवती?

(b) अधोरेखाङ्कितयोः पदयोः ***कस्यचित् एकस्य*** **संस्कृतभाषया देवनागरलिप्या च** विग्रहवाक्यं प्रदाय समासनाम लेखनीयम्। 2×1

(i) दयित त्वत्प्रसादादद्य मे चरितार्था श्रोत्रवृत्तिः।

(ii) अद्यैव क्षपावसाने विवाहनीया राजदुहिता।

(c) अधोरेखाङ्कितयोः यथाभिमत***मेकस्य*** संस्कृतभाषया देवनागरीलिप्या च व्याकरणसम्मता टिप्पणी लेखनीया। 2×1

(i) उत्तमाङ्गना विस्मयविकशिताक्षी सस्मितमिदमभाषत।

(ii) सुप्तयोस्तु तयोः स्वप्ने।

MURALIDHAR GIRLS' COLLEGE LIBRARY

(d) अधोरेखाङ्कितयोः यथाभिमत***मेकस्य*** व्युत्पत्तिः प्रदर्शनीया। 1×1

(i) ददृशुश्च तदवस्थं राजकुमारम्।

(ii) सहसोपसृत्य विविशुरन्तर्वंशिकपुरुषाः।

## Unit – II

**(Marks : 15)**

4. केन कथं च सुरतमञ्जरी अभिशप्ता? कथं सा अभिशापमुक्ता भूत्वा पूर्वरूपं प्राप्तवतीति संस्कृतभाषया देवनागरलिप्या च लेखनीयम्। 1+2+7

***अथवा,***

(a) कस्यचि**द्देकस्य** भावः सम्प्रसार्यताम्। 6×1

(i) पापे! भजस्व लोहजातिमजातचैतन्या सती।

(ii) क्षणे च तस्मिन् मुमुचे तदङ्घ्रियुगलं रजतशृङ्खलया।

(b) कस्यचि**द्देकस्य** विग्रहवाक्यं प्रदाय समासनाम लिख्यताम्। 2×1

(i) अजातचैतन्या 4(a)(i) प्रश्ने।

(ii) तदङ्घ्रियुगलम् 4(a)(ii) प्रश्ने।

(c) कस्यचि**द्देकस्य** कारकविभक्तिः निर्णेया। 1×1

(i) पापे 4(a)(i) प्रश्ने।

(ii) रजतशृङ्खलया 4(a)(ii) प्रश्ने।

(d) कस्यचि**द्देकस्य** व्युत्पत्तिः कार्या। 1×1

MURALIDHAR GIRLS' COLLEGE
LIBRARY

(i) भजस्व 4(a)(i) प्रश्ने।

(ii) सती 4(a)(i) प्रश्ने।

5. कस्यचि**द्देकस्य** मातृभाषया अनुवादः कार्यः। 5×1

(a) कः स महापुरुषो येनैतन्मानुषमात्रदुष्करं महत् कार्यमनुष्ठितम्।

(b) देव! दृष्टिदानेनानुगृह्यतामयमाज्ञाकरः। सोऽयमहमेवामुना रूपेण धनमित्राख्यया चान्तरितो मन्तव्यः।

## Section – C
## Unit – II
**(Marks : 15)**

6. (a) अधोलिखितेषु ***पञ्चानां*** प्रश्नानामुत्तरं **संस्कृतभाषया देवनागरलिप्या च** देयम्। 2×5

(i) वेतालपञ्चविंशतिकाग्रन्थे कति संख्यकानि आख्यानानि सन्ति? ग्रन्थस्यास्य केन्द्रियः चरित्रः कः भवति?

(ii) हितोपदेशे कति विभागाः सन्ति? तेषां नामानि लिख्यन्ताम्।

(iii) हितोपदेशः केन किमर्थं च रचितः?

(iv) पुरुषपरीक्षाग्रन्थस्य रचयिता कः? ग्रन्थे कति आख्यानानि सन्ति?

(v) सिंहासनद्वात्रिंशिकाग्रन्थे कति आख्यानानि सन्ति? ग्रन्थस्यास्यापरं नाम किम्?

(vi) पुरुषपरीक्षाग्रन्थस्य निष्कर्षः कः भवति?

(vii) हितोपदेशस्य उत्सः कः भवति? पञ्चतन्त्रात् हितोपदेशे कियन्ति आख्यानानि गृहीतानि?

(b) कस्यचि**दे*कस्य*** **संस्कृतभाषया देवनागरलिप्या च** टीका लेखनीया। 5×1

(i) पञ्चतन्त्रम्

(ii) शुकसप्ततिः।

MURALIDHAR GIRLS' COLLEGE
LIBRARY

MGC Library